## स्वरितञितः कर्त्रभिप्राये क्रियाफले । (७२/२८५१)

णेः इति निवृत्तम् । शेषात् कर्तरि परस्मैपदे (१.३.७८/२१५९) प्राप्ते स्वरितेतो ये धातवो ञितश्च तेभ्यः आत्मनेपदं भवति, [1]कर्तारं चेत् क्रियाफलमभिप्रैति । क्रियायाः फलं [2]क्रियाफलं प्रधानभूतम्, यदर्थमसौ क्रिया आरभ्यते तच् चेत् कर्तुर्लकारवाच्यस्य भवति । [3]यजते । पचते । [4]ञितः खल्वपि–सुनुते । कुरुते । [5]स्वर्गादि प्रधानफलमिह कर्तारमभिप्रैति । कर्त्रभिप्राये इति किम् ? यजन्ति याजकाः । पचन्ति पाचकाः । [6]कुर्वन्ति कर्मकराः । यद्यपि दक्षिणा भृतिश्च कर्तुः फलमिहास्ति तथापि न तदर्थः क्रियारम्भः ॥

## अपाद्वदः । (७३/२७४१)

कर्त्रभिप्राये[7] इति वर्तते । अपपूर्वाद् वदतेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति । धनकामो [8]न्यायमपवदते[9] । [10]न्यायापवादेन धनमर्जयिष्यामि इति मन्यते । कर्त्रभिप्राये क्रियाफले इत्येव, अपवदति[11] ॥

## णिचश्च । (७४/२८६४)

कर्त्रभिप्राये [12]क्रियाफले इति [13]वर्तते । णिजन्तादात्मनेपदं भवति कर्त्रभिप्राये क्रियाफले । कटं कारयते । ओदनं पाचयते । कर्त्रभिप्राये इत्येव, कटं कारयति [14]परस्य ॥

## समुदाङ्भ्यो यमोऽग्रन्थे । (७५/२७४२)

कर्त्रभिप्राये [15]इति वर्तते । सम् उद् आङ इत्येवंपूर्वाद् [16]यमेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति,[17] ग्रन्थविषयश्चेत् प्रयोगो न [18]भवति । व्रीहीन् संयच्छते । [19]भारमुद्यच्छते । वस्त्रमायच्छते । आङ्पूर्वादकर्मकात् 'आङो यमहनः' (१.३.२८/२६९५) इति सिद्धमे[20]वात्मनेपदम् । सकर्मकार्थमिदं[21] पुनर्ग्रहणम् । अग्रन्थे इति किम् ? उद्यच्छति चिकित्सां वैद्यः । कर्त्रभिप्राये इत्येव, संयच्छति । [22]उद्यच्छति । आयच्छति ॥

## अनुपसर्गाज् ज्ञः । (७६/२७४३)

कर्त्रभिप्राय इति वर्तते । अनुपसर्गाज् जानातेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति । गां जानीते । [23]अश्वं जानीते । अनुपसर्गात् इति किम् ? [24]स्वर्गं लोकं न [25]प्रजानाति मूढः । कर्त्रभिप्राये इत्येव, देवदत्तस्य गां जानाति[26] ॥

---

1. कर्त्रभिप्राये क्रियाफले गम्यमाने अ.फ. 2. क्रियाफलं नास्ति फ. 3. यजति ई. 4. स्वरितेतः इति किम्? तरति क, अतति, तरति अ. 5. स्वर्गादिकं अ. 6. कर्म इत्यधिकम् क, उदाहरणमिदं नास्ति फ. 7. क्रियाफले इत्यधिकम् फ. 8. न्याय्यम् ब. 9. यादृच्छिकमुपवदति इत्यर्थः इत्यधिकम् फ. 10. न्यायाद् फ. 11. अपवदन्ति इत्यधिकम् फ. 12. क्रियाफले नास्ति फ. 13. अनुवर्तते अ. क. 14. परस्य नास्ति फ. 15. इत्यादि अ. 16. यमः अ. 17. अग्रन्थे इत्यधिकम् अ.क.फ. 18. भवति नास्ति अ. 19. भारमायच्छते । वस्त्रमुद्यच्छते अ. 20. एव नास्ति अ.फ. 21. इदं नास्ति फ. 22. उद्यच्छति आयच्छति नास्ति अ. 23. उदाहरणमिदं नास्ति अ. 24. स्वर्गलोकं क. 25. प्रतिजानाति ब, प्रजानासि मूढ अ.फ. 26. यज्ञदत्तः इत्यधिकम् क.ह.